कुशान् गृहीत्वा प्रजापतिर्ऋषिर्व्वायुर्देवता दर्भ-कण्डिकाभ्यञ्जने विनियोगः। ॐ अक्तं रिहाणा व्यन्तु वयः। अनेनाग्रमध्यमूलानि घृतेनाभ्यनक्ति वारत्रयं मन्त्रश्च वारत्रयमेव पठनीयः। ततस्तान् कुशानद्भिरभ्युक्ष्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो रुद्ररूपोऽग्निर्देवता दर्भजुटिकाहोमे विनियोगः। ॐ यः पशूनामधिपती रुद्रस्तन्तिचरो वृषा। पशूनस्माकं मा हिंसीरेतदस्तु हुतन्तव स्वाहा। अनेनाग्नौ क्षिपेत्। तत अग्ने त्वं मृडनामासीति नाम कृत्वा गन्धमाल्यवस्त्रताम्बूलैरग्निमभ्यर्च्य प्रजापतिर्ऋषिर्व्विराट्छन्द इन्द्रो देवता यशस्कामस्य यजनीयप्रयोगे विनियोगः। ॐ पूर्णहोमं यशसे जुहोमि योऽस्मै जुहोति वरमस्मै ददाति वरं वृणे यशसा भामि लोके स्वाहा। अनेन पूर्णाहुतिं दद्यात्। ततो ब्रह्मणे पूर्णपात्रादि दक्षिणां दत्त्वा होमदक्षिणां कुर्य्यात्। ततः प्रदक्षिणेन दक्षिणं देशं गत्वा ब्रह्मग्रन्थिं मुक्त्वा प्रत्यागत्यासने पुनरुपविश्य कुशकुसुमसहितजलपात्रे हस्तं निधाय महावामदेव्य ऋषिर्व्विराड्गायत्रीच्छन्द इन्द्रो देवता शान्तिकर्म्मणि जपे विनियोगः। ॐ कया न चित्र आभुवदूती सदा वृधः सखा कया सचीष्ठया वृता। ॐ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः दृढ़ाचिदारुजे वसु। ॐ अभीषुणः सखीनामविता जरितॄणां शतम्भवास्यूतये। ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो वृहस्पतिर्दधातु। "एता ऋचो गीत्वा शान्तिं कुर्य्यात्। गानाशक्तौ एता एव ऋचस्त्रिरावृत्त्या पठेदिति। ततो दक्षिणां दत्त्वा अच्छिद्रावधारणं कुर्य्यात्। इति सर्व्वकर्म्मसाधारणमुदीच्यं कर्म्म समाप्तम्॥

कुशपः, पुं, (कुश् य संश्लेषे + बाहुलकात् कपन्।) पानपात्रम्। इत्युणादिकोषः॥

कुशपुष्पं, क्ली, (कुशाकारं पुष्पमस्य।) ग्रन्थिपर्णम्। इति रत्नमाला। गाँठियाला इति भाषा॥

कुशलं, क्ली, (कुश् + वृषादित्वात् कलन्। यद्वा कुं पापं तस्मात् शलति गच्छति पृथक् प्राप्नोतीत्यर्थः। कु + शल् + अच्।) कल्याणम्। (यथा, रघुः १।५८।
"प्रपच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः"॥*॥
समागमे विहिते अभिवादकमवरवयस्कं समानवयस्कमनभिवादकमपि ब्राह्मणं कुशलमिति शब्दविशेषोच्चारणेनैव कल्याणप्रश्नं पृच्छेत्। यदुक्तं मनौ २।१२७।
"ब्राह्मणं कुशलं पृच्छेत् क्षत्त्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च"॥)
पर्य्याप्तिः। पुण्यम्। (तद्वति, त्रि।
यथा, गीतायाम् १८।१०।
"नद्वेष्ट्यकुशलं कर्म्म कुशले नानुषज्जते"।
कौ पृथिव्यां शलति श्लाघां प्राप्नोतीति। शल + अच्।) शिक्षिते, त्रि। इत्यमरः।३।१।२०३॥ (यथा, मनुः ८।१५७।
"समुद्रयानकुशला देशकालार्थदर्शिनः।
स्थापयन्ति तु यां वृद्धिं सा तत्राधिगमं प्रति"।
कुशं लाति गृह्णाति। कुश + ला + कः। कुशग्राहकः। इति व्युत्पत्तिलब्धोऽर्थः॥)

कुशलवौ, पुं, (पुष्पवन्तोरिव एकशेषया तयोरेव बोधकत्वम् द्वन्द्वसमासे तु कुशश्च लवश्च तौ कुशीलवौ मित्रावरुणावित्यादिवज्ज्ञेयम्।) एकयोन्या रामपुत्त्रौ। इति हेमचन्द्रः॥ तयोर्नामकारणं यथा,—
"यस्तयोः प्रथमं जातः स कुशैर्म्मन्त्रसंस्कृतैः।
निर्म्मार्ज्जनीयो नाम्ना हि भविता कुश इत्यसौ॥
यश्चावरज एवासील्लवणेन समाहितः।
निर्म्मार्ज्जनीयो वृद्धाभिर्नाम्ना स भविता लवः॥
एवं कुशलवौ नाम्ना यमौ तौ सम्बभूवतुः।
भगवत्कृतनामानौ सुखिनावस्तयौ च तौ"॥
इति रामायणम्।

कुशलप्रश्नः, पुं, (कुशलः शुभः प्रश्नः।) कुशलजिज्ञासा। तत्पर्य्यायः। कौशली २। इति त्रिकाण्डशेषः॥

कुशली, स्त्री, (कुश इव लीयते। ली + डः गौरादित्वात् ङीष्।) अश्मन्तकवृक्षः। क्षुद्राम्लिका। इति वैद्यकम्॥

कुशली, [न्] त्रि, (कुशलं अस्त्यस्य। कुशल + इनिः।) मङ्गलान्वितः। (यथा, रघौ ५।४।
"अप्यग्रणीर्म्मन्त्रकृतामृषीणां
कुशाग्रबुद्धे! कुशली गुरुस्ते"॥)

कुशस्थलं, क्ली, (कुशप्रधानं स्थलम्।) 'कान्यकुब्जदेशः। इति हेमचन्द्रः॥ (यथा, वेणीसंहारे।
"कुशस्थलं वृकस्थलं माकन्दं वारणावतम्।
देहि मे चतुरो ग्रामान् कञ्चिदेकञ्च पञ्चमम्"॥)

कुशस्थली, स्त्री, (कुशस्थल + स्त्रियां ङीष्।) द्वारिका। इति जटाधरः॥ (यथा,—महाभारते २। सभापर्व्वणि १४।४९।
"इति सञ्चिन्त्य सर्व्वे स्म प्रतीचीं दिशमाश्रिताः।
कुशस्थलीं पुरीं रम्यां रैवतेनोपशोभिताम्"॥
पुर्य्येषा तु पुरा रैवतनाम्ना केनचित् नरपतिना निर्म्मिता कालवशात् राक्षसैरुत्सादिता श्वापदाश्रयीभूताऽऽसीत् ततो देवप्रमुखैर्यादवैः संस्कृता सती तेषामेव वासभूमिरासीत्॥)

कुशा, स्त्री, (कुश् य संश्लेषे + कः टाप् च।) रज्जुः। इति मेदिनी। मधुकर्कटिका। इति शब्दचन्द्रिका॥ वल्गा। इति हेमचन्द्रः॥ (छन्दोगाः स्तोत्रीयागणनार्थानौदुम्बरान् शङ्कून् कुशा इति व्यवहरन्ति॥ इति चिन्तामणिः॥)

कुशाकरः, पुं, (कुशैराकीर्य्यते समन्तात् अयेना मूलाच्छादनेन वेष्ट्यतेऽत्र। आ + कॄ + अधिकरणे अप्। कुशण्डिकासमये कुशैर्वेष्टनात् तथात्वम्।) अग्निः। इति शब्दमाला॥ (कुशां रज्जुं करोतीति व्युत्पत्त्या रज्जुकारकः।)

कुशाक्षः, पुं, (कुश इव सूक्ष्मं क्षुद्रमित्यर्थः अक्षि यस्य। समासे षच्।) वानरः। इति शब्दमाला॥

कुशाग्रीयमतिः, त्रि, (कुशाग्रीया कुशाग्रं अग्रवत् सूक्ष्मा मतिर्यस्य।) तीक्ष्णबुद्धिः। (यदुक्तं शिष्टैः।
"अहह भाष्यकारस्य कुशाग्रीयधियावभौ।
नैव शब्दाम्बुधेः पारं किमन्ये जड़बुद्धयः"॥)
तत्पर्य्यायः। सूक्ष्मदर्शी २ तत्कालधीः ३ प्रत्युत्पन्नमतिः ४। इति हेमचन्द्रः॥ सूक्ष्मायां बुद्धौ कर्म्मधारयत्वञ्च स्त्री॥

कुशारणिः, पुं, (कुशं शापप्रदानार्थं जलं अरणिरिव यस्य।) दुर्व्वासाः। इति त्रिकाण्डशेषः॥

कुशाल्मलिः, पुं, (कुत्सितः शाल्मलिः।) रोहितवृक्षः। इति राजनिर्घण्टः॥

कुशिंशपा, स्त्री, (कुत्सिता शिंशपा।) कपिलशिंशपा। इति राजनिर्घण्टः॥

कुशिकः, पुं, (कुशः कुशसंज्ञको महीपालो जनकत्वेनाप्त्यस्य। कुश + ठन्।) स्वनामख्यातनृपविशेषः। (स तु विश्वामित्रपितामहः गाधेः पिता। एतद्विवरणन्तु महाभारते १३। भीष्मयुधिष्ठिरसंवादे ५२ अध्यायमारभ्य द्रष्टव्यम्॥) फालः। सर्ज्जवृक्षः। विभीतकवृक्षः। इति हेमचन्द्रः॥ अश्वकर्णवृक्षः। इति राजनिर्घण्टः॥ तैलशेषः। इति विश्वः॥ केकरे त्रि। इति शब्दमाला॥

कुशितं, त्रि, (कुश् + इतच्। यद्वा कुशसंश्लेषे + क्त इट् च।) जलमिश्रितम्। इत्युणादिकोषः॥

कुशी, स्त्री, (कुश + लयोविकारार्थे "जानपदेति" ४।१।४२। इति ङीष्।) फालः। इति मेदिनी॥

कुशी, [न्] पुं, (कुशाः सन्त्यस्य। समाधियोगकाले आसनेषु कुशोत्पन्नत्वात्।) वाल्मीकिमुनिः। इति हेमचन्द्रः॥ (कुशविशिष्टे, त्रि। यथा, महाभारते १३। मेघवाहनोपाख्याने १४।१७४।
"दिनेऽष्टमे तु विप्रेण दीक्षितोऽहं यथाविधि।
दण्डी मुण्डी कुशी चीरी घृताक्तो मेखलीकृतः"॥)

कुशीदं, क्ली, (कुसीद + पृषोदरात् सस्य शत्वम्।) वृद्धिजीविका। इत्यमरटीकायां भरतः॥ रक्तचन्दनम्। इति मुकुटमालातन्त्रम्॥

कुशीलवः, पुं, (कुत्सितं शीलं अस्य इति कुशीलः। कुगतीतिसमासः अन्यत्रापि दृश्यते इति वः। यद्वा कुशीलं वाति गच्छति प्राप्नोतीति यावत्। वा + कः।) चारणः। इत्यमरः। २।१०।१२॥ नटविशेषः। कथकादिः। इत्यन्ये। देशान्तरे कीर्त्तिं प्रचारयति यो नटः। इत्यन्ये। इति भरतः॥ (एते हि अपाङ्क्तेया हव्यकव्ययोर्व्वर्ज्याः। यथा, मनुः ३।१५५।
"कुशीलवोऽवकीर्णी च वृषलीपतिरेव च"॥
कुशीलवत्वमस्य नाट्यशास्त्रप्रचारकत्वात् वाल्मीकिमुनिः॥)

कुशीलवौ, पुं, (कुशश्च लवश्च तौ कुशीलवौ।) एकयोन्या रामपुत्त्रौ। इति हेमचन्द्रः॥
(यथा, रामायणे ७। १०७ सर्ग।
"अभिषिच्य महात्मानावुभौ रामः कुशीलवौ"॥)

कुशीवशः, पुं, (कुशीव कुशवान् सन् शेते समाधौ अत्रतिष्ठते इति। शी + डः।) वाल्मीकिमुनिः। इति त्रिकाण्डशेषः॥

कुशूलः, पुं, (कुसूल + पृषोदरात् शत्वम्।) तुषानलः। इति जटाधरः॥ धान्यागारम्। तत्पर्य्यायः। अन्नकोष्ठकः २। इति हेमचन्द्रः॥ व्रीह्यागारम् ३।